# Krishnastotramdanava

# कृष्णस्तोत्रम्दानव

## Document Information

Text title : kRRiShNastotramdAnava

File name : kRRiShNastotramdAnava.itx

Category : vishhnu, krishna, vishnu

Location : doc_vishhnu

Proofread by : PSA Easwaran psawaswaran

Description/comments : Edited by S. V. Radhakrishna Shastriji

Acknowledge-Permission: Mahaperiaval Trust

Latest update : May 13, 2018

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 22, 2023

*sanskritdocuments.org*

# कृष्णस्तोत्रम्दानव

दानवकृतं
वामनोऽसि त्वमंशेन मत्पितुर्यज्ञभिक्षुकः ।
राज्यहर्ता च श्रीहर्ता सुतलस्थलदायकः ॥ १॥

बलिभक्तिवशो वीरः सर्वेशो भक्तवत्सलः ।
शीघ्रं त्वं हिंस मां पापं शापाद्गर्दभरूपिणम् ॥ २॥

मुनेर्दुर्वाससः शापादीदृशं जन्म कुत्सितम् ।
मृत्युरुक्तश्च मुनिना त्वत्तो मम जगत्पते ॥ ३॥

षोडशारेण चक्रेण सुतीक्ष्णेनातितेजसा ।
जहि मां जगतां नाथ सद्भक्तिं कुरु मोक्षद ॥ ४॥

त्वमंशेन वराहश्च समुद्धर्तुं वसुन्धराम् ।
वेदानां रक्षिता नाथ हिरण्याक्षनिषूदनः ॥ ५॥

त्वं नृसिंहः स्वयं पूर्णो हिरण्यकशिपोर्वधे ।
प्रह्लादानुग्रहार्थाय देवानां रक्षणाय च ॥ ६॥

त्वं च वेदोद्धारकर्ता मीनांशेन दयानिधे ।
नृपस्य ज्ञानदानाय रक्षायै सुरविप्रयोः ॥ ७॥

शेषाधारश्च कूर्मस्त्वमंशेन सृष्टिहेतवे ।
विश्वाधारश्च शेषस्त्वमंशेनापि सहस्रदृक् ॥ ८॥

रामो दाशरथिस्त्वं च जानक्युद्धारहेतवे ।
दशकन्धरहन्ता च सिन्धौ सेतुविधायकः ॥ ९॥

कलया परशुरामश्च जमदग्निसुतो महान् ।
त्रिःसप्तकृत्वो भूपानां निहन्ता जगतीपते ॥ १०॥

अंशेन कपिलस्त्वं च सिद्धानां च गुरोर्गुरुः ।

मातृज्ञानप्रदाता च योगशास्त्रविधायकः ॥ ११॥

अंशेन ज्ञानिनां श्रेष्ठौ नरनारायणावृषी ।
त्वं च धर्मसुतो भूत्वा लोकविस्तारकारकः ॥ १२॥

अधुना कृष्णरूपस्त्वं परिपूर्णतमः स्वयम् ।
सर्वेषामवताराणां बीजरूपः सनातनः ॥ १३॥

यशोदाजीवनो नित्यो नन्दैकानन्दवर्धनः ।
प्राणाधिदेवो गोपीनां राधाप्राणाधिकः प्रियः ॥ १४॥

वसुदेवसुतः शान्तो देवकीदुःखभञ्जनः ।
अयोनिसम्भवः श्रीमान् पृथिवीभारहारकः ॥ १५॥

पूतनायै मातृगतिप्रदाता च कृपानिधिः ।
बककेशिप्रलम्बानां ममापि मोक्षकारकः ॥ १६॥

स्वेच्छामय गुणातीत भक्तानां भयभञ्जन ।
प्रसीद राधिकानाथ प्रसीद कुरु मोक्षणम् ॥ १७॥

हे नाथ गार्दभीयोनेः समुद्धर भवार्णवात् ।
मूर्खस्त्वद्भक्तपुत्रोऽहं मामुद्धर्तुं त्वमर्हसि ॥ १८॥

वेदा ब्रह्मादयो यं च मुनीन्द्राः स्तोतुमक्षमाः ।
किं स्तौमि तं गुणातीतं पुरा दैत्योऽधुना खरः ॥ १९॥

एवं कुरु कृपासिन्धो येन मे न भवेज्जनुः ।
दृष्ट्वा पादारविन्दं ते कः पुनर्भवनं व्रजेत् ॥ २०॥

ब्रह्मा स्तोता खरः स्तोता नोपहासितुमर्हसि ।
सदीश्वरस्य विज्ञस्य योग्यायोग्ये समा कृपा ॥ २१॥

इत्येवमुक्त्वा दैत्येन्द्रस्तस्थौ च पुरतो हरेः ।
प्रसन्नवदनः श्रीमानतितुष्टो बभूव ह ॥ २२॥

इदं दैत्यकृतं स्तोत्रं नित्यं भक्त्या च यः पठेत् ।
सालोक्यसार्ष्टिसामीप्यं लीलया लभते हरेः ॥ २३॥

इह लोके हरेर्भक्तिमन्ते दास्यं सुदुर्लभम् ।
विद्यां श्रियं सुकवितां पुत्रपौत्रान् यशो लभेत् ॥ २४॥

इति दानवकृतं कृष्णस्तोत्रं सम्पूर्णम् ।

Proofread by PSA Easwaran

*Krishnastotramdanava*

pdf was typeset on December 22, 2023

Please send corrections to *sanskrit@cheerful.com*